National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 275-277
© 2025 NJHSR
www.sanskritarticle.com

**डा. कृष्ण ए नागसम्पिगे**
योजनासहायकः,
ओरियन्टल् रीसर्च् इन्स्टिट्यूट्,
मैसूरु

**Correspondence:**
**डा. कृष्ण ए नागसम्पिगे**
योजनासहायकः,
ओरियन्टल् रीसर्च् इन्स्टिट्यूट्,
मैसूरु

# शरीरम्

**डा. कृष्ण ए नागसम्पिगे**

द्वादशविधप्रमेयेषु शरीरं द्वितीयं प्रमेयम्। अतः अवसरसङ्गत्या आत्मनिरूपणानन्तरं शरीरनिरूपणं क्रीयते ।

**शरीरपदव्युत्पत्तिः**

शरीर इति पदं "शीर्यते इति व्युत्पत्या विनश्यद्द्रव्यं बोधयति । तद्द्रव्यं आत्मनः भोगायैव कल्प्यते । तदीयादृष्टजन्यत्वात्। "भोगायतनम् शरीरम्" इति भाष्यकृतो वाक्यम्। भोगः नाम सुखदुःखान्यतरसाक्षात्कारः। यदवच्छेदेन विभावत्मनि सुखदुःखान्यतरसाक्षात्कारः भवति तत् शरीरम्। शरीरस्य देहः, गात्रं, कायः इत्यादयः पर्यायशब्दाः। परन्तु सत्स्वपि पर्यायान्तरेषु तस्य शरीरशब्देनोद्देशे विनाशित्वेन जुगुप्सितताया वेराग्यजननमेव निमित्तमत्र वेदितव्यम्। तदाह सूत्रकारः- "चेष्टेन्द्रियार्थाश्रयः शरीरम्"" इति । चेष्टानां इन्द्रियाणां अर्थानां च आश्रयभूतं शरीरम्॥ "अन्त्यावयवि भोगाश्रयः शरीरम्" " इत्येकं लक्षणम्। 4 "अन्त्यावयवि इन्द्रियाश्रयः शरीरम्" इत्यपरं लक्षणम्। तत्प्रमाणयति तार्किकरक्षायां वरदराजः-

**"शरीरमन्त्यावयवी चेष्टाभोगेन्द्रियाश्रयः"** इति।

न्यायसिद्धान्तमालायाम् -

**"सुखदुः खाधिष्ठानं चेष्टेन्द्रिययोग्यदृष्टसम्भूतम्"** इति ॥ ?

यदुक्तं 'चेष्टेन्द्रियाश्रयः शरीरम्' इति तत्र चेष्टा नाम हिताहितप्राप्तिपरिहारानुकूल क्रिया चेष्टा। मृदुकुसुमकार्पासादौ हितबुद्धिः। कण्टकादौ अहितबुद्धिः। तेषु हितस्य प्राप्तिः अहितस्य परिहारः तदनुकूल क्रिया चेष्टा । सा क्रिया सत्येव शरीरे आत्मप्रेरणया भवति । नान्यथा । तस्मात् तादृशक्रियाणां आश्रयः शरीरम्। तेन हस्तादिक्रियाजन्यक्रियावतः मुसलादेः न शरीरत्वप्रसङ्गः मुसलादिक्रियाणां आत्मप्रेरणाजन्यत्वाभावात्॥

द्वितीयं लक्षणम्- 'इन्द्रियाश्रयः' इति । इन्द्रियाणि घ्राणरसनचक्षुस्त्वक् श्रोत्राणि मनश्च शरीरे अनुगृहीते अनुगृह्यन्ते उपहते च उपहन्यन्त इति तेषामाश्रयः शरीरम् । अर्थाः रूपरसगन्धस्पर्शादयः यद्यपि तत्तद्रव्यवर्तिनः न शरीरवर्तिनः तथाऽपि ते इन्द्रियविषयास्सन्तः शरीरे सत्येव सुखदुःखनिमित्तानि भवितुं अर्हन्तीति शरीराश्रिताः उच्यन्ते॥

**लक्षणकरणे बीजम्**

यदुक्तं 'चेष्टमिन्द्रियार्थाश्रयः शरीरम्' इति तत्र शरीरत्यजातिमत्वमेव शरीरस्य लक्षणमिति वक्तुमुचितम्। तेन हि समानासमानजातीयकेभ्यः तद्व्यवच्छिद्यते। तस्मिन् सत्यपि चेष्टेन्द्रियार्थाश्रयत्वं यदुक्तं तत्तु तेन रूपेण आत्मनः भोगायतनत्वज्ञापनार्थम्। चेष्टेन्द्रियार्थाश्रयतया हि शरीरं आत्मनः भोगसाधनं भवति । यः मुमुक्षुः स एतादृश शरीरइन्द्रिय अर्थेभ्यः भिन्नः आत्मा इति तद्व्यतिरिक्तत्वेन आत्मतत्त्वज्ञानवान् सन् भोगसाधने शरीरादौ जिहासावान् भवेदिति ज्ञापनाय तदाश्रयत्वमिति लक्षणमभिहितं सूत्रकारेण॥

शरीरलक्षणे दोषशङ्का तत्परिहारश्च

ननु चेष्टेन्द्रियाश्रयत्वं इति यदुक्तं तदयुक्तम् तथा हि पाषाणान्तर्गतमण्डूकशरीरेषु तदाश्रयत्वादर्शनात् अव्याप्तिः स्यात् इति न वाच्यम् । तत्राऽपि योग्यतायाः भावात्। तंत्र क्रियायोग्यतायां सत्यामपि निर्विवर-निबिडदृषत्कर्परोपरुद्धावकाशतया असौ भेकः चलितुं न प्रभवति । स्फुटिते च तस्मिन् लक्षणे तत्र भवत्येव असौ चलत् दृश्यते इति। निबिडपाशसंयतशरीरवत् तदानीं चेष्टायाः अदर्शनेऽपि नाव्याप्तिः ॥

**इन्द्रियाश्रयत्वपरीक्षा**

भवतु 'चेष्टाअयत्यम्' इति लक्षणम्। तथाऽपि इन्द्रियाश्रयत्वं तु कथम्? यतो हि सर्वाणि इन्द्रियाणि भौतिकानि स्वस्यावयवसमाश्रितानि । यथा चक्षुरिन्द्रियं भौतिकं तेजोरूपम'। रसनेन्द्रियं जलीयम्। घ्राणेन्द्रियं पार्थिवं इति तत्तदिन्द्रियं स्वावयवसमाश्रितम्। श्रोत्रस्य मनसश्च नित्यद्रव्यत्वात् अनाश्रितत्त्वम् इति कथं इन्द्रियाश्रयत्वलक्षणं उपपन्नं इति उच्यते। अत्र आश्रयत्वं इत्यनेन आधाराधेयभावः न विवक्षितः। 'घटाश्रयः भूतलम्' इतिवत् न किन्तु आश्रितत्वं इत्यनेन अनुग्राह्यत्वं विवक्षितम्। अनुग्राह्यानुग्राहकभावः तथा दर्शितः। च शरीरस्य इन्द्रियाणां च परस्परम् देश-काल-दशानुकूल पथ्य-भोजन-अभ्यङ्गव्यायाम-मर्दनादि उपचारोपचितं शरीरं, तत् शरीरवृत्ति इन्द्रियाणि पटुतराणि स्वविषयग्रहणसामर्थ्याविशिष्टानि भवन्ति। दीर्घार्ध्व-लङ्गन (निरशन) कदशनशुष्कजरत्पुरन्ध्री - सेवनादि क्लिष्टशरीरस्य तु पुंसः इन्द्रियाणि मन्दशक्तीनि भवन्ति इति अनुग्राहकत्वात् इन्द्रियाणां आश्रयः शरीरं भवति ।

अर्थाश्रयत्वपरीक्षा

अस्तु चेष्टेन्द्रियाश्रयत्वम्। अर्थाश्रयत्वं तु कथम्। अर्थानां रूपरसगन्धस्पर्शादीनां केषाञ्चित् तत्समवायिनां आश्रयः भवति तत्तच्छरीरम् । यथा रूप, रस, गन्ध, स्पर्शादयः अर्थाः। रूपादीनां यद्यपि आश्रयः भवति पृथिवीशरीरम् । न तु वायवीयं तावता च किञ्चित् भोगायतनत्योपयोगि न भवति ?। किञ्च लक्षणमपि अतिव्यापकं रूपरसादिरूपार्थसमवायस्य वृक्षादावपि सत्वात् । तस्मात् न यथाश्रुत अर्थाश्रयत्वमिह अभिप्रेतम् । किन्तु ये च अर्थाः भोक्तुः आत्मनः रागादिवृद्धिहेतवः भवन्ति तादृशाः, शरीरनिष्ठाः एव भवन्ति न वृक्षादिनिष्ठाः ॥ तदुक्तं न्यायमञ्जर्याम्"य एते परवनितादि शरीरवर्तिनः प्रविकचमुचुकुन्दकुन्दकन्दलकन्दकुमुदकुड्मलादि बाह्य-विषय-समवायिनश्च रूपरसादयः अर्थाः रमणीयतां आदधानाः रागादिवृद्धिहेतवः भवन्ति भोक्तुरात्मनः शरीरे सति न शरीररहितस्य इति अर्थानां भोगसाधनभावादाश्रयः शरीरम् ॥" इति अपि च अर्थाश्रयत्वमपि सकलाः ये अर्थाः तदाश्रयत्वमिति नार्थः विवक्षितः येन केषाञ्चिदेव आश्रयः शरीरम् इति प्रागुक्तास्वारस्वं स्यात् । किन्तु भोक्तुः तत्तच्छरीरलक्षणम् आत्मनः ये अर्थाः साधनीभूताः तत्तदाश्रयत्वमेव तत्तदाश्रयत्वमेव तत्तच्छरीरलक्षणम्। तदित्थं भोगायतनत्वेन बन्धहेतुत्वादेयमित्यर्थः । तथा च सुष्ट्रक्तं ग्रन्थकारेण 'चेतनेन्द्रियार्थाश्रयत्वं शरीरत्वम्' इति॥

एतावता चेष्टेन्द्रियार्थाश्रयत्वं शरीरस्य लक्षणमस्तीत्यधुना अस्मदादिशरीरं किं रूपमिति विचार्यते।

(किं पार्थिवं ? उत नानाभूतनिर्मितमिति विचार्यते) ॥

अत्राऽऽद्यं प्रश्नः- ननु किमनया परीक्षया प्रयोजनम् ? यतः हि

**'निः श्रेसोपयोगो हि यः शरीरस्य दर्शितः ।**

**सोऽनेकप्रकृतित्वेऽपि न स तस्य विशिष्यते ॥** इति ।

अत्र शरीरस्य पार्थिवत्वं विज्ञेयम् । देहेन्द्रियादिविलक्षणत्वेन आत्मा विज्ञेयः। तत्र देहादिस्वरूपविज्ञानाभावे तदतिरिक्तस्यात्मनः ज्ञानासम्भवः। तस्मात् शरीरादिस्वरूपं विज्ञेयम् ।

मानवशरीरस्य पार्थिवत्वादिविकल्पाः

अस्मदादिशरीरं पाञ्चभौतिकम् । अर्थात् पञ्चभूतेभ्यः विनिर्मितम् । तथाऽपि अस्मदादिशरीरं पार्थिवमिति व्यवह्रीयते । पृथिवीकार्यस्य गन्धस्य प्राचुर्येणोपलम्भात्॥ अतः अस्मदादिशरीरं पार्थिवम्।

* पृथिवी जलं च कारणमिति केचित् । यतो हि शरीरे क्लेदः अनुभूयते । जलसंयोगे असति कथं वा क्लेदः शरीरे उत्पद्येत ? अतः क्लेदसद्भावात् पृथिवीजलाभ्यां विनिर्मितम् इति ।

* अपरे पृथिवी-जलं-तेजः इति त्रितयरचितम् इति ॥ यतः तत्र स्वेदवत् ऊष्मणोऽपि सत्वमनुभूयते॥

* पृथिवी-जल-तेज-वायुरचितमिति केचन । शरीरे वायुकार्यस्य, प्राणादिवाय्वोः सर्वत्रानुभूयमानत्वात्॥

क्षित्यप्तेजोमरुद्व्योमरचितमिति अन्ये। अवकाशरूपाकाशस्य अन्तः उपलभ्यमानत्वात्।

न्यायनये तावत् पृथिव्यप्तेजोवाय्वाकाशजन्यं इदं शरीरम् इति निर्णयः। पाञ्चभौतिकं इदं शरीरं नेति केचित् वदन्ति । प्रत्यक्षाप्रत्यक्षाणां यः संयोगः तस्याप्यप्रत्यक्षत्वात् तदारब्धस्याऽपि अप्रत्यक्षत्वं स्यात्। यथा वायोः आकाशस्य वा प्रत्यक्षत्वं न कस्यचित् भवति ।

प्रत्यक्षाप्रत्यक्षाणां यः परस्परं संयोगः स खलु न प्रत्यक्षः। कस्मात्? तदाश्रयाणां अप्रत्यक्षत्वात् । प्रत्यक्षाणां एवं एषः प्रत्यक्षः । तस्मात् कार्यद्रव्यं इदं शरीरं यदि पञ्चात्मक (पाञ्चभौतिकम्) तर्हि प्रत्यक्षं न स्यात्"। उक्तं च उपस्कारे- "गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकं यदि शरीरं भवेत् अप्रत्यक्षं भवेत्। यथा प्रत्यक्षाप्रत्यक्षाणां वायुवनस्पतीनां यः संयोगः अप्रत्यक्षः तथा शरीरमपि अप्रत्यक्षं स्यात् इति ।

उक्तं च सूत्रे- 'प्रत्यक्षाप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकत्वं न विद्यते। तस्मात् शरीरं न पाञ्चभौतिकम्। अनयेव युक्त्या चातुर्भौतिकत्वमपि निराकृतं वेदितव्यम्। एवं पूर्वपक्षमभिधाय अन्ते वैशेषिकसूत्रे तद्व्याख्यासु च पञ्चभूतमिलनं शरीरेऽङ्गीकृतम्।

अणूनां पार्थिवजलीयतैजसानां परस्परं संयोगस्तु न प्रातिषिद्धः न निषिध्यते च । किन्तु तत्संयोगरूपासमवायिकारणात् द्रवयान्तरं परं निषिध्यते। एवं भूतत्रयाणां समवायिकारणत्वं च। अत्र भूतानां तत्संयोगत्वसमवायि- असमवायिकारणत्वनिषेधे एव तात्पर्यं न तु तन्निमित्ततानिषेधे। तथा च मानुषादिशरीरस्यापि जलाद्यु-पष्टम्भकत्व-स्वीकारात् क्लेदपाकादीनां नासङ्गतिः। शरीर-स्यात्मकत्वस्वीकारे पृथिवीत्वजत्वादिजातीनां परस्परसाङ्कर्य-

प्रसङ्गात् । किं पार्थिवत्वं स्वीकार्य उत जलीयत्वं इत्यत्र विनिगमकं नास्ति इति, शङ्का माभूत्। अस्ति विनिगमकम्। स्वाभाविकगन्धवत्वस्यैव पार्थिवत्वे विनिगमकत्वात्। शुष्कशरीरेऽपि गन्धः अनुभूयते । परन्तु क्लेदः नानुभूयते। अतः स्वाभाविकत्वात् गन्धस्य पार्थिवत्वमेव शरीरस्येति सिद्धम् । तदाह सूत्रकारः- 'पार्थिवं तदिशेषगुणोपलब्धेः ॥

शरीरस्य पार्थिवत्वं श्रुतिसम्मतम्

वेदे हि कार्यं कारणे विलीयत इति प्रसिद्धम् । तत्र अग्निषोमीयादिपशोः यजमानस्य वा प्रेतस्य पात्रचयनकर्मणि 'सूर्य ते चक्षुर्गमयतात्'। 'पृथिवीं ते शरीरम्' । इत्यादि श्रूयते। एतश्च कार्यं कारणे विलीयत इति ज्ञापयति । अत्र शरीरं पृथिव्यां विलीयत इति श्रवणात् । शरीरं पार्थिवमिति निश्चीयते । उक्तं च -

'तस्मात् पृथिव्यवयवैरयमस्मदादिदेहो निबद्ध इति नात्र सतां विवादः । सोऽयं च दुःखवसतेर्भवमन्दिरस्य स्तम्भः कठोर इति यत्नत एव हेयः ॥ इति ।

शरीरमिदं भवकारणं दुःखनिदानं च। तस्मात् दुःखकारणीभूते शरीरादौ विराग अवश्यकः।

**संदर्भ ग्रन्थ सूची :-**

1. तर्कसङ्ग्रहदीपिका (नीलकण्ठीयादि व्याख्यासहिता) पृ- १४९
2. न्या. सू. १.१.११, पृ- ३२
3. तार्किकरक्षा (वरदराजकृत) पु.सं. ७१
4. तार्किकरक्षा (वरदराजकृत) पु.सं. ७१
5. तार्किकरक्षा- पृ- ७१
6. न्यायसिद्धान्तरत्नमाला - पृ. ९३
7. इन्द्रियं नयनं वह्निः सुवर्णादिः विषयोमतः- कारिकावली - श्लो. ४२, पृ. २०

   चक्षुरिन्द्रियम्, तैजसम्, परकीयस्पर्शाव्यञ्जकत्वे सति परकीयरूप-व्यञ्जकत्वात् प्रदीपवत्- मुक्तावली - पृ. २०
8. रसनेन्द्रियम, जलीयम्, गन्धाव्यञ्जकत्वे सरि रसव्यञ्जकत्वात् (न्या. मु. पृ-१९)
9. 'न्यायमञ्जरी - पृ.सं - ३६२
10. न्यायमञ्जरी पृ.सं. ३६३
11. वैशेषिक भाष्यम्- पृ.सं. २५२
12. वैशेषिकसूत्रम्- अ- ४, आ-२, सू-२, पृ- २५१
13. वैशेषिकसूत्रोपस्कारः- पृ.सं. २५१
14. न्या. सू. ३.१.२८, पृ- २४३ वै. सू. वि. पृ-२५४
15. न्या.म. आ-८, पृ-३६५